522

अनुमान चिंतामणि:

Anumāna Chintamani	Title
Gangeśa Upadhyaya	Author
	Editor
	Year, Vols.
	Publisher
522	Remarks

वि॰ व्या॰ १ राम॰ १

श्रीगणेशाय नमः श्रीविश्वनाथाय नमः प्रत्यक्षोपजीवकत्वात्प्रत्यक्षानंतरं बहुवादिसंमतत्वादुपमानात्प्रागनुमानं नि
रूप्यते तत्र व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यं ज्ञानमनुमितिस्तत्करणमनुमानम् तच्च लिंगपरामर्शो न तु परामृ
श्यमानं लिंगमिति वक्ष्यते अथानुमानं न प्रमाणं योग्योपाधीनां योग्यानुपलंभादभावनिश्चयेऽप्ययोग्योपाधि
शंकया व्यभिचारसंशयात् शतशः सहचरितयोरपि व्यभिचारोपलब्धेश्च लोके धूमादिदर्शनानंतरं वह्न्यादिव्यवहा
रस्तु संभावनामात्रात् संवादेन च प्रामाण्याभिमानादिति नाप्रत्यक्षप्रमाणमिति तन्न अप्रमाणसाधारणधर्मेणाप्रामाण्य
साधने इष्टसाधर्म्यस्यानुमानत्वात् एतद्वाक्यस्य संदिग्धविपर्यस्तान्यतरं प्रति स्वयं वक्तव्यत्वात् तयोश्च परकीययोरप्र
तीतत्वात् अनुमानं न प्रमाणमिति वाक्यस्य प्रामाण्याप्रामाण्ययोर्व्याघाताच्च अपि चानुमानाप्रामाण्ये प्रत्यक्षस्याप्य
प्रमाणत्वापत्तेः प्रामाण्यस्यानुमेयत्वात् स्वतः प्रामाण्यग्रहेऽनंतरसंशयानुपपत्तेः व्याप्तिग्रहोपायश्च वक्ष्यते नन्व
नुमितिहेतुव्याप्तिज्ञाने का व्याप्तिः न तावदव्यभिचरितत्वम् तद्धि न साध्याभाववदवृत्तित्वम् साध्यवद्भिन्नसाध्या
भाववदवृत्तित्वम् साध्यवत्प्रतियोगिकान्योन्याभावासामानाधिकरण्यं सकलसाध्याभाववन्निष्ठाभावप्रतियो
गित्वम् साध्यवदन्यावृत्तित्वं वा केवलान्वयिन्यभावात् नापि साध्यासामानाधिकरण्यानधिकरणत्वं साध्यवैय
धिकरण्यानधिकरणत्वं वा तदुभयमपि साध्यानधिकरणानधिकरणत्वम् न च तत्र पर्याप्तिः किंचित्साध्यानधिक
रणाधिकरणे धूमे चाप्रसिद्धम् अपि चेदं वाच्यं ज्ञेयत्वादित्यादौ समवायित्वपयावाच्यत्वाभावो घटत्ववत्प्रसिद्धः ॥

अधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्य केवलान्वयित्वात् न चैवं घटत्ववद्व्यभिचारः साधनावच्छेदकावच्छिन्न
प्रतियोगिसाध्यकाभाववदवृत्तित्वं व्यभिचारः न च वाच्यत्वाभावस्तादृशो घट इति वेत्तर्हि तादृशसाध्याभावसामानाधि
करणाभावो व्याप्तिः तथा चाप्रसिद्धिः प्रतियोग्यवृत्तिश्च धर्मेण प्रतियोगितानवच्छेदकः नहि विशिष्टज्ञानस्याभावधी
हेतुत्वात् अन्यथा निर्विकल्पकादपि घटो नास्तीति प्रतीत्यापत्तिः गवि शशशृंगं नास्तीति प्रतीतेरसिद्धेः शशशृंगं ना
स्तीति च वाक्यात् शृंगाभावस्यार्थः अन्यसाध्यासामानाधिकरण्यानधिकरणत्वे सति साधिकरणत्वं व्याप्तिः केवल
केवलान्वयिनि च साध्यासामानाधिकरण्यनिरधिकरणेऽप्याकाशादावप्रसिद्धमिति चेन् न साध्यासामानाधिकर
ण्यं हि तु साध्यानधिकरणाधिकरणत्वं साध्याधिकरणानधिकरणत्वं वा केवलान्वयिनि च किंचित्साध्यानधिक
रणाधिकरणत्वमेव व्याप्तेः नापि स्वसमानाधिकरणात्यंताभावाप्रतियोगिसाध्यसामानाधिकरण्यं पर्वती
यवन्हेर्महानसीयधूमसमानाधिकरणात्यंताभावप्रतियोगित्वात् द्रव्यत्वादेर्व्याप्यवृत्तिसव्याप्यतापत्तेश्च न च
प्रतियोगिविरोधित्वं व्याप्यवृत्तित्वं वा भावविशेषणम् संयोगादेः साध्यमत्वादेरनेकांतिकत्वाभावप्रसंगात् न
हि प्रतियोगी विरोधी व्याप्यवृत्तिर्वा संयोगादेरपरोऽप्यत्यंताभावोऽस्ति अधिकरणभेदेनाभावभेदे मानाभावात्
नापि साधनवन्निष्ठान्योन्याभावाप्रतियोगिसाध्यवत्त्वं मूलेऽवृक्षः कपिसंयोगवानेतद्वृक्षत्वादित्यनेन प्रतीतेस्तद्दूष्यमा

अ॰ वि॰ २ भावव्यापिनऽसत्वात् नचैवं भेदाभेदः अवच्छेदकभेदेन तत्तस्याभ्युपगमात् साधनवन्निष्ठान्योन्याभावाप्रतियो
गिसाध्यवद्यस्येति चेत् अर्थ व्याप्यव्यापकभावानिरूपणात् साध्यसाधनयोर्व्याप्तिनिरूप्यत्वात् वह्निमत्वेन तस्य धूम
वन्महानसनिष्ठान्योन्याभावप्रतियोगित्वाच्च विशेषाभावकूटेनैवाभावव्यवहारोपपत्तौ सामान्याभावे माना
भावात् नापि साधनसामानाधिकरण्यावच्छिन्नाभिन्नत्वेऽप्यधिकरणानधिकरणसाध्यसामानाधिकरण्यम्
साधनसमानाधिकरणस्य प्रमेयत्वादेर्व्यधिकरणाप्रसिद्धेः महानसादौ समवायेन योवह्नेर्वह्निमतो वा असत्ता
भावयोः साभावयोः सत्ताधर्मादावपि ऋक्षलक्षणसंभवाच्च अथ अनौपाधिकसंबंधो व्याप्तिः उपाधिश्च साध्य
व्यापकत्वे सति साधनाव्यापकः व्यापकत्वं तु तन्निष्ठात्यन्ताभावाप्रतियोगित्वम् अव्यभिचारो यावत्स्वमस्तूपाधिः प्रति
योगित्वं न विरोधित्वं महानसस्यानियमलक्षणं गोत्वाश्वत्वयोरनधानात् अन्योन्याभावप्रतियोगिन्यसत्वाच्च
किंतु यथाधिकरणाभावयोः स्वरूपसंबंधविशेषस्तथाप्रतियोगित्वानुयोगित्वमपि स्वभावविरहात्मकत्वेवेति चे राम॰ २
तिचेत् न यत्किंचित्साध्यव्यापकसाधनाव्यापकधर्मनिषेधो न धूमादौ प्रकृतसाध्यव्यापकसाधनाव्यापकधर्म
स्यापि सिद्धिमान्निवेकशंकः यावत्साध्यव्यापके प्रमेयत्वादौ साधनाव्यापकत्वं यावत्साधनाव्यापके घटत्वा
दौ साध्यव्यापकत्वं निषिध्यत इति चेन्न आधिकरणत्वात् यावत्साधनाव्यापकमव्यापकं पक्षसाध्यस्य यावत्साध्यव्या

व्यापकं यावत्साधनसमत्वं न हीति चेन्न सोपाधेरपि तथात्वात् तथाहि साधनस्य वह्नेर्व्यापकं यावदार्द्रेन्धनं
तत्प्रत्येकमव्यापकं साध्यधूमस्य द्वितीये साध्यधूमस्य व्यापकमार्द्रेन्धनं न व्यापकं महानसीयवह्नेः नानापि सा
ध्यपावद् व्यभिचारित्वे व्यभिचारित्वे अनौपाधिकत्वे साध्याव्यभिचारित्वस्यैव गमकत्वसंभवात् तच्च रूपवि
नम् नापि कात्स्न्येन संबंधो व्याप्तिः एकव्यक्तिके तदभावात् नानाव्यक्तिके विसकलधूमसंबन्धस्य प्रत्येकं वह्न्याव
भावात् अत एव कृत्स्नेन साध्येन संबंधो न व्याप्तिः विपक्षव्यापितेन अभावाच्च नच यावत्साधनाश्रयाश्रितसाध्य
संबंधः साधनाश्रयमहानसादौ सत्कृत्स्नेन प्रत्येकवह्नेराश्रितत्वाभावात् नापि साधनसमानाधिकरणयावद्धर्मस
मानाधिकरणसाध्यसामानाधिकरण्यं यावद्धर्मसामानाधिकरण्यं हि यावद्धर्माधिकरणाधिकरणकत्वं तच्च प्र
सिद्धम् साधनसमानाधिकरणसकलमहानसत्वाद्यधिकरणाप्रतीतेः नापि स्वाभाविकः संबन्धो स्वभावजन्यत्वेन
स्वाश्रितत्वादेर्वा आसत्तिर्व्याप्तेः नाप्यविनाभावः केवलान्वयिन्यभावात् अथ संबंधमात्रं व्याप्तिः व्यभिचारित्वं
ध्यव्यापिके नचित्तादृशव्यापित्वात् धूमादिव्याप्तिस्तु हि विशिष्येव निर्वक्तव्येति चेन्न लिंगपरामर्शो स्वविषयव्याप्तिस्व
रूपनिरूपणप्रस्तावे लक्षणाभिधानस्यार्थान्तरत्वात् नच संबंधमात्रं न्यायनयेवादन्तु मितनुत्पत्तेः नापि व्या
प्तिपरप्रवृत्तिनिमित्तमिदं संबंधस्यानेकव्याप्तिपरप्रयोगात् किंवलान्वयिनि केवलान्वयिसंबंधो व्यतिरेकिणा सा

ध्यवदन्यावृत्तित्वं व्याप्तिः एतयोरनुमितिविशेषजनकत्वं अनुमितिमात्रे पक्षधर्मतैव प्रयोजिका न चातिप्र
सङ्गः विशेषसामग्रीसहिताया एव सामान्यसामग्र्याः कार्यजनकत्वनियमादिति केचित् तदपि न साध्यव
दन्यावृत्तित्वस्यैव धूमासत्त्वात् वह्निमत्पर्वतान्यस्मिन् धूमसत्त्वात् न च सकलसाध्यवदन्यावृत्तित्वं वह्निमतां
प्रत्येकं तथात्वात् सर्वत्र लक्षणे साध्यत्वसाध्यवत्त्वतद्भिन्नत्वानां व्याप्तिनिरूप्यत्वेनात्माश्रयः साध्यत्वं हि न सि
द्धिकर्मत्वं सिषाधयिषाविषयत्वं वा महानसीयवह्नेस्तदभावात् न च सामान्यतो व्याप्त्यवगतौ स्वपरस्य कथ
मनुमानेनासाधकतां साधयेदिति वाच्यम् स्वार्थानुमानोपयोगिव्याप्तिस्वरूपनिरूपणं विना कथायाप्र
वेशादिति अत्रोच्यते प्रतियोग्यसमानाधिकरणयत्समानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकावच्छिन्नं
यन्न भवति तेन समं तस्य सामानाधिकरण्यं व्याप्तिः अत्र निरुक्तवह्नेर्धूमवत्यवृत्तेरत्यन्ताभावप्रतियोगित्वेऽपि
तत्प्रतियोगिता न वह्नित्वेनावच्छिन्ना धूमवति वह्निर्नास्तीत्यप्रतीतेः सामान्यावच्छिन्नप्रतियोगिताकाभाव स्वी
कारे च अन्यथा सकलप्रतियोग्यभावे प्रसिद्धरूपवह्न्यत्वे चावगते कापीदृशने वा वापूरूपवान्नवेति संशयो न
स्यात् विशेषाभावकूटस्य निश्चितत्वात् यद्वा प्रतियोग्यधिकरणस्वसमानाधिकरणात्यन्ताभावाप्रतियोगि
ताभावसामानाधिकरण्यम् यत्समानाधिकरणान्योन्याभावप्रतियोगि यन्न भवति तेन समं तस्य सामानाधिकर एम० ३

ण्यं वा स्वसमानाधिकरणान्योऽन्याभावाप्रतियोगित्वं वा अत्र वह्निमद्धेतोरवृत्तिधूमवान्निषेधासंता
भावान्योन्याभावप्रतियोगित्वाद्यधिकरणधूमवत्त्वोर्न व्याप्तिः किन्तु तद्धूमस्य स्वसमानाधिकरणतद्वह्निना न चैवं धू
ममात्रेण व्याप्तिरिति वाच्यम् सर्वधूमस्यैकैकस्य तथात्वेन धूममात्रस्य व्याप्यत्वात् धूमसंबन्धे वह्निसत्त्वाद्यवयवदूस
त्वविनष्टयोघ्न व्याप्तिरेव कर्मणि च संयोगाभावः प्रतियोग्यसमानाधिकरणः यद्वा प्रतियोगिवैयधिकरण्यावच्छेदकाव
च्छिन्नत्वमत्यन्ताभावविशेषणं कर्मणि स्वसंयोगात्यन्ताभावस्य प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नत्वमेव। न
न चान्योऽन्याभावस्याव्याप्यवृत्तित्वम् अभेदस्याबाधितप्रत्यभिज्ञानात् व्याप्यव्यापकभावात्तानेऽप्यवृत्तेस्तत्तथा
त्वेनाज्ञायमानस्य संबन्धत्वेनैव भानस्य पक्षधर्मत्वं न चैवमननुगमो व्यापकस्य कालातिरिक्ताननुगतस्यैव लक्ष्यत्वा
त् अत्र धूमवति वह्निमद्भेदेन तत्र धूमवान् वह्निमद्भेदेन भवतीति प्रतीतेः व्यासज्यवृत्तिप्रतियोगिकोऽयं किं वह्निमतोरन्य
ताभावान्योऽन्याभावो धूमवति विद्यते इति कथमनेन लक्षणे इति चेन्न तादृशाभावानभ्युपगमात् अभ्युपगमे वा तदभ
यप्रतियोगि न च वह्निवह्निमतो अव्याप्यवृत्तिवैयधिकरण्यव्याप्तिः तद्रूपावच्छिन्नसमानाधिकरणात्यन्ताभावप्रतियोगि
तावच्छेदकावच्छिन्नं यन्न व्याप्तियोगीकात्यन्ताभावसमानाधिकरणं यत्तेन सामानाधिकरण्यम् नन्वेवं सोपाधिः तत्र सा
धनसमानाधिकरणात्यन्ताभावप्रतियोगिनि उपाधौ इन्धनवत्त्वादौ अत्यन्ताभावस्तेन समं साध्यस्य धूमादेः सामाना
धिकरण्याभावात् उपाधेः साध्यव्यापकत्वात् एतदेव यावत्स्वव्यभिचारिव्यभिचारिसाध्यसामानाधिकरण्यमनौपाधिक

लंगीपने यद्यावद्धत्समानाधिकरणासंताभावाप्रतियोगिप्रतियोगिकागताभावासामानाधिकरण्यं यस्तत्पतदेवा
नैयाधिकत्वम् सोपाधौ तत्साध्यवन्निष्ठासंताभावाप्रतियोगिनउपाधेर्योऽसंताभावस्तेन सममेतोः सामानाधिकरण्यम्
उपाधेः साधनाव्यापकत्वात् यद्वा मत्संबंधितावच्छेदकरूपवत्त्वं यस्तत्तस्याप्तिः तथाहि धूमस्य वह्निसंबंधधूमत्वम
वच्छेदकं धूममात्रस्य वह्निसंबंधित्वात् वन्हेस्तु धूमसंबंधित्वं न वह्नित्वमवच्छेदकं धूमासंबंधिनिगतत्वात् नत्वेति
प्रसक्तमवच्छेदकं संयोगादौ तथादेशनात् किंतु वन्ह्याद्याद्रेंधनप्रभववह्नित्वं धूमसंबंधितावच्छेदकं नार्द्रेंधनंचवा
प्यमेव अथवा यत्सामानाधिकरण्यावच्छेदकावच्छिन्नं यस्य स्वरूपं तेन तस्य व्याप्यम् वह्निसामानाधिकरण्यं हि धूमे
धूमत्वेनावच्छिद्यते सोपाधौ तूपाधिना अत एव साधनतावच्छेदकभिन्नेन येन साधनत्वाभिमतं साध्यसंबंधोः वच्छि
द्यते तदेव तत्र विशेषणमुपाधिरिति वदंति अत एव च मत्र साधनाव्यापकत्वे सति साधनावच्छिन्नसाध्यव्यापकत्वं स
ष्टरां ध्रुवम् व्यभिचारिणि साधने एकत्र साध्यतदभावयोर्विरोधेनावच्छेदकभेदं विना तदुभयसंबंधाभावादवश्यं
साध्यसंबंधितावच्छेदकमस्ति तदेव हि साधनावच्छिन्नसाध्यव्यापकं साधनाव्यापकं च तत्रोपाधिः अत एव व्यभि
चारे चावश्यमुपाधिरिति संगच्छते अन्यथा व्यभिचारादेव तत्रागमकत्वेन व्यभिचारित्वेन तदनुमानमप्रयो
जकत्वात् अत एव तस्य साध्यसंबंधितावच्छेदकरूपलक्षणा व्याप्तिः साधनत्वाभिमते च कास्तीति स्फुटिके ज

पाकुसुमवदुपाधिरित्यायुक्तमते लक्षणं तु साध्यसाधनसंबंधव्यापकत्वे सति साधनाव्यापकत्वम् विषम
व्याप्तस्य चोपाधित्वं वाच्यः प्रवृत्तिनिमित्ताभावात् दूषकता च तेस्य व्यभिचारोन्नायकतया न च व्यभिचा
रोन्नायकत्वमेवोपाधित्वम् अप्रयोजकस्य साध्याव्यापकस्य व्यभिचारिणोप्युपाधितापत्तिरिति सेयं व्याप्तिर्न भू
योदर्शनगम्या दर्शनानां प्रत्येकमहेतुत्वात् आशुविनाशिनां क्रमिकाणां मेलकाभावात् नच तावद्दर्शन
जन्यसंस्काराः इंद्रियसहकृता व्याप्तिधीहेतवः प्रत्यभिज्ञायामिन्द्रियस्तथा कल्पनागौरवात् समानविषय
यस्मरणे प्रत्यभिज्ञाने च संस्कारो हेतुः अतः कथं सहचारविषयसंस्कारो व्याप्तिज्ञाने तस्येव अन्यथा
अतिप्रसंगात् किंच संबंधभूयोदर्शनं भूयस्सु स्थानेषु दर्शनम् भूयसा दर्शनम् भूयांसि दर्शनानि वा नेत
थाएकत्र रूपरसयोर्द्वित्वबुद्धेस्वयोर्व्याप्तिग्रहात् एकत्रैव यावाद्वाहिके तद्दोषप्रसंगात् भूयस्त्वस्य त्रिचतु
रादित्वेनाननुगतत्वाच्च अपि च पार्थिवत्वलोहलेख्यत्वादौ शतशो दर्शनेऽपि व्याप्त्यग्रहात् तर्कसहकृतं
तथापि चेत् तर्हि सहचारदर्शनं व्यभिचारादर्शनसहकृतं व्याप्तिग्राहकोऽस्तु आवश्यकत्वात् किं
भूयोदर्शनेनैव तेन विना तर्कस्यैवानवतारात् प्रथमदर्शनेऽपि व्यभिचारशंकाभावात् न चैवमेवास्तु तर्क
स्य व्याप्तिग्रहमूलकत्वेनानवस्थानात् ज्ञानयावद्व्यभिचारस्फूर्तिनिवृत्ति हेतु अनुमितिजनकव्याप्तिज्ञाने तर्कवि
लंबेनानानवस्थेति चेन्न तर्हि व्यभिचारज्ञानाभावोपि व्याप्तिग्रहे हेतुः न च तेषु अवान्तरजातिरस्ति। सामान्यप्र

सत्तासर्वोपसंहारेण तस्याविनाभावग्रहः सामान्यरूपतावच्छेदकसम्बन्धेन गम्येति भूयोदर्शनापेक्षेति चेत् न सामा
न्यस्य हि धूमसन्निले व्याघातात् नहि सामान्यतया ज्ञातस्य तद्रूपेण पुरस्कारमाद्य नच काकतालीयत्वादिशंकाया
र्थं हि नीयादिदर्शनापेक्षेति वाच्यम् द्वितीयादिदर्शनेऽपि तच्छंकाया अनिवृत्तेः स्यात् नचैवं व्याप्याधिकरणज्ञानं व्याप्ति
धीहेतुः तद्देशकालान्तरावच्छिन्नघटादिनामुपाधित्वशंकानिरासाय कस्यचित्साधनव्यापकत्वज्ञाने कस्यचित्सा
ध्याव्यापकत्वज्ञानेन स्यात् नच भूयोदर्शनं विना न तदिति चेत् न भूयो व्याप्योपाधिव्यतिरेकस्यानुमानेन ज्ञानेऽन्येना
वच्छेदनात् अथ साध्यसाधनसहचारितधर्माणामुपाधित्वसंशये व्याप्तिग्रहो न स्यात् तेषामनुपाधित्वज्ञानं
भूयोदर्शनाधीनं साध्याव्यापकत्वज्ञानेन तन्नीतिरित्यर्थं भूयोदर्शनापेक्षा अत एव पार्थिवतादर्शनेन न तद्विशेष्यस्ताव
प्रतिबंधक इति नहि घनत्वमापकमिति चेत् न भूयो व्याप्योपाधिसंशयाधीनव्यभिचारसंशयस्य तथाप्यनुच्छेदात्।
सच न भूयोदर्शनाद्व्याप्त्यनुमानादिसूक्ष्मम् अपि भूयोदर्शनाहितसंस्कारेण वहिरिंद्रियसहकारिणा धार्यं वि
नापि सहचारादिज्ञानवता व्याप्तिग्रहात् नापि मनसः इंद्रियादिवत् भूयोदर्शनजन्यसंस्कारस्य न ज्ञानस्मर
णस्य वा प्रमाणान्तरतापत्तेः तस्मात् सरिंद्रियेण सहकृतं इन गम्यस्य तथाहि उपाध्यभावो व्याप्तिः अभावश्च केव
लाधिकरणं तत्कालसंबंधो वा स्वप्रकाशकस्य न तत्तज्ज्ञानं वा तत्प्रत्यक्षेण वियत्त्वमेवचक्षुरादिना नवाधिक

रणभावोऽस्ति नच प्रतियोगिज्ञानप्रधिकरणादि ज्ञानमनेकयेनोपाधिज्ञानं विना न तस्मात् एवमुपाध्य
भावे ज्ञाते किंचिन्नावशिष्यते उपाध्यभावव्यवहारस्तु न हि धूमस्य नो हि विध्यत्वव्यवहारस्त्वोपाधिज्ञानम् नचै
वं तस्य सबंध ऽस्य वह्नि धूमसंबंध ज्ञानादेवानुमितिः स्यादिति वाच्यम् उपाधिस्मरणे तस्योपाधित्वे व्याप्य
त्वस्य कथं तदुपलंभकस्य मयथा नेधोपाध्यनुपलंभसहितस्य केवलाधिकरणज्ञानस्यानुमितिहेतुत्वात्
व्यवहार हेतुत्वात् अनुएव प्रथम दर्शने व्याप्तिनिश्चयात् द्वितीयदर्शनेसतिरासभादिसंशयवतस्तत्संश
यो न स्यादिति चेत् व्याप्तिज्ञानानंतरं किं विद्यमानस्य वो पाधिर्न्यो पाधित्वेन न ज्ञातस्तं शंकया गृहीत
व्याप्तावपि संशयः तस्य च भूयोदर्शनादि नोपाधिनिरासद्वारा सभावशंकापनीयते यद्वा ज्ञाने मा
णसंशयात् व्याप्तिसंशयः यथा घटज्ञानसामग्र्यां तस्यां घटज्ञाने सतिप्रामाण्यसंशयादितः तत्संश
योनुत्पद्यते सम संशयानुरोधेन तत्र घटज्ञानमेव न तत्त्वमिति कुतस्तेन कोलादिउपाध्यभावस्य व्याप्तित्वात्
तस्य केवलाधिकरणस्य प्रथमदर्शनेन निश्चितत्वात् व्याप्तिग्राहकं तराभावाच्च परिशेषेण सकृद
र्शनस्यैव ग्राहकत्वात् तच्चिन्निश्चयस्य प्रामाण्यसंशयादिवनन्तत्संशयः नचैवं रासभं वः पिप्र धूमं व्याप्तिनिश्चि
यस्यादिति वाच्यम् तत्र व्याप्तेरभावात् प्रत्यक्षज्ञाने विषयस्य कारणत्वात् क्वचित् तर्कश्च तथा अवतारणे

न्या॰वी॰ ६६

यमाहुस्तन्मन् न चानाविनश्या स्यादेवेति निमित्तानुसरणं न तु निमित्तमस्तीत्यागेपद्यस्यपगमात् केचित्त
साधनवद्विष्ठात्यंताभावप्रतियोगीसाध्यसामानाधिकरण्यं साधनसमानाधिकरणान्योन्याभावाप्रतियो
गिसाध्यवत्कत्वं वा व्याप्तिः तदुभयमपि योग्यत्वात्तत्प्रकृते वह्निधूमसंबंधानुभवेन प्रत्यक्षमवगतमेव मत्वान
सेयोत्यंताभावोऽन्योन्याभावो वावगतप्रतियोगीन वह्निनवाधादिधूमानित्यनुभवात्तासमभेनधावगतेप्यन्ग्रेस
वाध्यतरत्याहुः तन्न एवं तेन तत्र धूमवत्त्वादेव व्याप्तिः स्यात् ठधूमत्ववह्नित्वावच्छेदेनन च तद्धेतुग्रानोपयो
गीवह्नित्ववह्निमत्वं वा न प्रतियोगितावच्छेदकमिति प्रत्यक्षतो ज्ञातुमशक्यमिति नैवम् प्रकृते साध्यव्याप
कत्वे सति साधनाव्यापको यः साधनत्वाभिमतेन प्रकृतसाध्यसंबंधितावच्छेदकं विशेषणं सोपाधिः उभयथा
पि तदभावो न व्याप्तिः सिद्धसिद्धिभ्यां तन्निषेधानुपपत्तेः किंतु यावत्त्वव्यभिचारि व्यभिचारित्साध्यसामानाधि
करण्यमनोपाधिकत्वं तस्य च प्रत्यक्षज्ञानसमवयकत्वात् किंच न वह्निगताप्तेर्ज्ञानहेतुः किंतु व्याप्तित्वेन तत्
व्योपाध्यभाववत्त्वम् न चोपाधेरज्ञाने तदभावत्वेन ज्ञानसंभवात् विशेषणज्ञानसाध्यत्वादिविशिष्टज्ञानस्य न
च नियमतः प्रत्यक्षमनुपाधिर्धीरस्ति यदुक्तं प्रतियोगिज्ञानं व्यवहारहेतुर्नाभावज्ञानस्येति अत एव तावदेवं तथा
विनुपाध्यभावो मा व्यवहारो ठपाध्यभावज्ञानाधीनानुमितिः स्यादेवोपाधिज्ञानं विनापि नचैवम् वस्तुतस्तु॰ राम॰ ६६

विशेषादर्शने सहचारदर्शनसाधारणधर्मदर्शनात् व्यभिचारसंशयात् प्रथमदर्शनेन न व्याप्तिनिश्चयः अथ व्यभिचा
रसंशयो न व्यभिचारनिश्चयप्रतिबंधकग्राह्यसंशयस्य तन्निश्चयाप्रतिबंधकत्वात् अन्यथा संशयानंतरं कापि नि
श्चयो न स्यादिति चेत् न व्यभिचारसंशयः प्रतिबंधक इति भ्रमः किंतु विशेषादर्शनसति सहचारसाधारणधर्मद
र्शनात्संशयः स्यात् तत्संशयसामग्रीतो निश्चयइति। किंच यद्वीत्सामग्रीप्रतिबंधकाय चाविशेषादर्शनसतितत्र न दोर
पीति व्यभिचारसंशयोपि प्रतिबंधकः एवं भूयोदर्शनमपि व्याप्तिसंशयदंतर्कस्य तद्वत्त्वात् ठस्तु एवेतिकथं व्याप्तिग्र
हइति अत्रोच्यते व्यभिचारज्ञानविरहसहकृतं सहचारदर्शनं व्याप्तिग्राहकम् ज्ञानं निश्चयः शंका च सा च क्वचिदु
पाधिसंदेहात् क्वचिद्विशेषादर्शनसहितसाधारणधर्मदर्शनात् तद्विरहश्च क्वचिद्विपक्षबाधकतर्कात् क्वचित्स्वतःसि
द्ध एव तर्कस्य व्याप्तिमूलत्वेनानवस्थेति चेत् न यावदाशंकं तर्कानुसरणात् यत्र च व्याघातेन शंकैव न भवति तत्र
तर्कं विनैव व्याप्तिग्रहः इति व्याप्तिग्रहोपायः तथा हि धूमो यदि वह्निसमवहितज्जन्यत्वे न स्याद्वह्निसमवहितजन्य
स्यात् ऽसेत स्यादिति त्रिविधमेवं ह्येवं धूमव्यभिचारी नितर्षि तद्विना विभविष्यति अत्र चेत्तदेवासमवस्मान इति शंका
स्यात् सर्वत्र व्यर्थक्रियाव्याघातः यदि गृहीता न्यायव्यभिचार्के हेतुं विना कार्यमस्मिन्नाकेन न होस्य यमेव धूमार्थं वह्नेः स्ति
प्रार्थभोजनसम्परप्रतिपत्तदर्थं शब्दस्य योपादानं नियमतः कथं कुर्यात्तेन च विनापि तत्संभवात् न स्यात् इत्यादान

त॰चि॰
७

मेव तादृशशंकाप्रतिबंधकं शंका या च नानवस्था यादृशेन निपतो यादाने च न शंका तत्तदिदमुक्तम् तदेवव्याशंक्यते यस्मिन्नाशंक्यमाने
स्वक्रियाव्याघातो न भवति॥ न हि संभवति स्वयं वह्न्यादिकं धूमादिकार्यार्थं नियमत उपाददानस्तत्कारणं तन्नेत्याशंकते चेति॥ एतेन
व्याघातो विरोधः स च सहानवस्थाननियम इति तत्राप्यनवस्थेति निरस्तम् स्वक्रियाया एव शंकाप्रतिबंधकत्वात्। अत एव व्याघातो
यदि शंकास्ति न चेच्छंका ततस्तराम्। व्याघातावधिराशंका तर्कः शंकावधिः कुत इति खंडनमपास्तम्॥ न हि व्याघातः शंकाश्रित
किंतु स्वक्रियैव शंकाप्रतिबंधिकेति। न वा विशेषदर्शनात्क्वचिच्छंकानिवृत्तिर्विस्यात्॥ न चैतादृशतर्कावतारे भूयोदर्शनं वि
नेति भूयोदर्शनादरः न तु सहचार एव प्रयोजकः। अत एव न तद्दाहितसंस्कारो मानांतरं तर्कस्याप्रमात्वात्॥ तत्र प्रत्यक्षव्याप्तिज्ञाने
तु हेतुतदभावोपस्थापकानुमानान्यथा व्याप्तिग्रहात्॥ ननु सहचारदर्शनं व्यभिचारादर्शनवत् व्यभिचारशंकाविरहानुकूलतर्को यो हि
न व्यभिचारि साधारण्यमिति न ततो व्याप्तिनिश्चय इति चेन्न। स्वरूपसतोरेव तयोर्व्याप्तिग्राहकत्वात्। सत्तर्को व्याप्तिप्रमा तदाभासा
तद्भ्रमा विशेषदर्शनसत्त्वासत्त्वाभ्यां पुरुषज्ञानानि वा॥ अपरे तु॥ यत्र तर्के व्याप्त्यनुभवो मूलं तत्र तर्कात्प्रागेव ज्ञाय यत्र तु व्याप्तिस्म
रणं हेतुर्न तत्र तर्कोत्तरमेव ज्ञानमनवस्था। अस्ति च ज्ञातमात्रस्येष्टसाधनतानुमितिहेतुः व्याप्तिस्मरणं तदानीं व्याप्त्यनुभवकाभावा
त्। तन्मूलानुभवमूला वाग्रेपि व्याप्तिस्मरणपरंपरेति॥ यत्तु अनादिसिद्धकार्यकारणभावविरोधादिमूलाः केचित्तर्का इति तन्न तत् ॥ राम ७
त्र प्रमाणानुयोगे अनुमान एव पर्यवसानात्। न व्याप्तिग्रहान्यथानुपपत्त्यैव तर्कस्यानादिसिद्धव्याप्तिकल्पनम्। अनुपपत्ते

स्यानुमानत्वात्॥ अन्ये तु॥ विपक्षबाधकतर्कादनौपाधिकत्वग्रह एव तदधीनो व्याप्तिग्रह इति तदधीनतर्कस्याप्रमाणत्वात् व्यभिचारादिशंका
निरासद्वारेण प्रत्यक्षादिसहकारी स इति चेत्तन्न। अनवस्थाभयेन तर्कं विना व्याघाताद्यत्र शंकाविरहस्तत्र व्याप्तिग्रहे तर्कस्य व्यभिचारात् यत्तु यो
ग्यतानुपाधीनां योग्यानुपलब्ध्याभावग्रहो अयोग्यानां तु साध्यव्यापकत्वसाधनाव्यापकत्वसाधनाभावग्रह इत्यन्तौपाधिकत्वग्रह इति।
तन्न तुच्छम्॥ अनुमाने तत्साधने अनवस्थानात्॥ प्रमाणांतरस्याभावात्॥ ये चात्रानुकूलतर्कं विनैव सहचारदर्शनादिमात्रेण व्याप्तिग्रहं वदं
ति॥ तेषां पक्षेतरत्वस्य साध्यव्यापकत्वग्रहे नुमानमात्रमुच्छिद्येत। अनुमानमात्रोच्छेदकत्वादेव पक्षेतरत्वोपाधिरिति चेत् भ्रांतोऽसि नहि
वयमुपाधित्वेन तस्य दोषत्वमाचक्ष्महे॥ किंतु साध्यव्यापकत्वेन तद्व्यतिरेकात्पक्षे साध्यव्यावर्तकतया व्यापकव्यतिरेके व्याप्यव्यतिरेकस्याव
श्यत्वेऽपायमानत्वात् अपि च करवन्हिसंयोगः शक्त्यातिरिक्तातींद्रियधर्मसमवायी जनकत्वादित्यत्राप्रयोजकत्वान्न साधकम्। तत्र व्याप्त्य
पक्षधर्मत्वोकमप्रयोजकत्वेनाम॥ तस्माद्विपक्षबाधकतर्काभावात्तत्र व्याप्तिग्रह इत्यप्रयोजकत्वमिति॥ इति तर्कः॥ छ॥ उक्तव्याप्तिप्र
कारद्वयोऽन्याभावगर्भैव व्याप्तिरनुमितिहेतुः लाघवात्॥ अतो नानुगमः॥ अनौपाधिकत्वं तु तद्ग्रहणम्॥ नन्वेवमुपाधिरहितधुयत्रीयत्वे
न व्यभिचारवत् हेत्वाभासांतरं स्यात्॥ न तु व्याप्त्यभावत्वेनासिद्धिरिति चेत् तन्न ज्ञानमुपधीयमपि न त्वतोऽदूषकम्। न त्वन्यस्य साध्यव्यापकत्व
साधनाव्यापकत्वज्ञानमन्यस्य साध्यव्याप्यत्वज्ञाने प्रतिबंधकं अतिप्रसंगात्॥ व्यभिचारज्ञानस्य तदुन्नायकत्वात् तद्दीत्वया॥ न वा नौपाधिकत्वज्ञानं व्या
प्तिज्ञाने हेतुरित्युक्तम्॥ तथा च व्यभिचारज्ञानद्वारेण दूषक॥ एवं च परमुखनिरीक्षकतयासिद्धसाधनवत् पृथक् न चैवमव्यभिचारस्य व्याप्ति
त्वे व्यभिचारस्तदभावत्वेनासिद्धिः स्यादिति वाच्यम्॥ साध्याभाववद्वृत्तित्वं हि व्यभिचारः तदभावश्चाव्यभिचारः केवलान्वयिन्यभावात्॥ किंतु

अ०मू०टी० त्वसमानाधिकरणात्यंताभावाप्रतियोगिसाध्यसामानाधिकरण्यम॥ न चानयोः परस्परविरहत्वमिति॥ इति व्याप्त्यनुगमः॥ ६॥ व्याप्तिग्रहश्च सामा
८ न्यलक्षणाप्रत्यासत्त्या सकलधूमादिविषयः॥ कथमन्यथा पर्वतीयधूमव्याप्त्यग्रहे तस्मादनुमितिः॥ सा चेंद्रियसंबद्धविशेषणतानिरुक्तैव वा॥
तद्विशेष्यकप्रत्यक्षे तादृशेंद्रियसंनिकर्षस्य हेतुत्वेनानागतादौ संयोगादेरभावादिति वदंति॥ तदपरे न मन्यंते॥ तथा हि॥ धूमत्वावच्छिन्ना व्याप्तिः स
न्निकृष्टधूमविषये धूमत्वेन प्रत्यक्षेण ज्ञायते॥ ततः स्मृतासात्तीयलिंगपरामर्शे पक्षनिष्ठधूमवृत्तितया ज्ञापितेततोनुमितिः॥ तदनभ्युपग
मेऽपि सन्निकृष्टधूमविषयो धूमत्वेन धूमो वह्निव्याप्य इत्यनुभवः॥ तथैव व्याप्तिस्मरणात् तथैव धूमवानयमिति व्याप्तिस्मृतिसहकारेण धूमत्वेन
पक्षवृत्तिधूमज्ञानादनुमितिः॥ व्याप्त्यनुभवतत्स्मरणाय च धर्मताज्ञानानामेकप्रकारकत्वे नानुमितिहेतुत्वात्॥ गवादिपदेष्वपि ज्ञात्यनुभवतत्स्म
रणा वाक्यार्थानुभवानामेकप्रकारकत्वेन हेतुहेतुमद्भावद्दृत्य पूर्वं वक्ष्यते॥ तत्र योग्यतावगाहदृष्टपूर्वव्यक्तिलाभोऽनुमानेत्युपहृधर्मतावलात्॥ धू
मो वह्निव्याप्य इत्यनुभवो न तु सर्वो धूमो वह्निव्याप्य इति॥ येन सर्वभानार्थं तत्स्वीकारः॥ वह्निमानित्यनुमितिः विशेषणाभानसाध्यविशिष्टज्ञानत्वात्
दिति पर्वतीयवह्निज्ञानार्थं तत्कल्पनं धूमेऽपि तथा कश्चिद्धूमस्याविव्यापकत्वात् चेन्न विशिष्टवैशिष्ट्यज्ञानेव विशेषणतावच्छेदकप्रकारकज्ञा
नस्यावश्यकत्वेन हेतुत्वात्॥ तच्च हन्तमेव न तु विशेषणज्ञानमपि तथा गौरवात्॥ गौरयमिति विशिष्टज्ञानेऽपि पूर्वपद्धिशेषणाविशेष्यसन्निक
र्ष एव कारणं न तु निर्विकल्पकं मानाभावात्॥ विशिष्टज्ञानमेव मानमिति चेन्न॥ इच्छाताभावात्॥ हंडीपुरुष इत्यत्र विशेषणाधीन्तपत्वानभ्युपग
मात्॥ विशिष्टवैशिष्ट्यज्ञानत्वात्॥ अपि च प्रमेयत्वेन व्याप्तिग्रहेच्छिन्न सर्वज्ञः स्यात् तथा च परकीयज्ञानविषयेऽपि घटत्वं न वेति तत्संशयो नः राम
स्यात्॥ प्रमेयत्वेन तत्ततत्पत्तरनिश्चयात्॥ प्रमेयत्वेन घटं जानाति घटत्वेन तत्तत्र जानातीति चेत् तत्किंचित्घटत्वं तत्प्रमेयत्वेन तत्तज्जानीयात् ८

कलघटवृत्तिधर्मस्य प्रमेयत्वेन तद्ज्ञानासंभवात्॥ उच्यते॥ यदि सामान्यलक्षणा नास्ति तदाऽनुकूलतर्कादिकं विना धूमादौ व्यभिचा
रसंशयो न स्यात्॥ प्रसिद्धधूमे वह्निसंबंधमानात् कालांतरीयदेशांतरीयधूमस्य मानाभावेन ज्ञानाभावात्॥ सामान्येन तु सकलधूमो
पस्थितौ धूमांतरे विशेषदर्शनेन संशयोपपत्तेः॥ यत्तु पाकादौ चिकीर्षा सुखत्वादाविच्छा न स्यात्॥ सिद्धेऽच्छाविरहात्॥ असिद्धस्याज्ञा
नात्॥ तस्या सुखत्वादिना ज्ञाते तु सर्वसुखसिद्धेर्विहायासिद्धेऽच्छा भवतीत्यभ्युपेयमिति॥ तन्न॥ अदसिद्धस्याज्ञानेऽपि सिद्धतावरहा
नादृवेच्छा प्रवृत्तिर्व्यभिचारादेश्छिन्नतयोपपत्तेः॥ न चातिप्रसंगः॥ समानप्रकारकत्वेन ज्ञानेच्छाकृतीनां कार्यकारणभावात्॥ ननु समा
नविषयत्वेनापि॥ क्वचिदपि अकल्पनात्॥ समानविषयत्वेऽप्युपस्थितसमानप्रकारकज्ञानाभावेनेच्छाकृत्योरभावात्॥ तस्यावश्यकत्वेनौ
रवाच्चिति पराभिसंधानात्॥ न च सर्वज्ञत्वेन संशयो न स्यादिति वाच्यम्॥ घटः सद्वृत्तिघटत्वप्रकारकं हि ज्ञानं संशयविरोधित्वेन दृष्टं ज्ञानसामग्री विरहा
त्॥ अतो घटत्वादिसकलविशेषज्ञानेऽपि घटो न वेति संशयः॥ उपाधिज्ञानाद्व्यभिचारज्ञाने सत्येन व्याप्तिनिश्चयप्रत्यनुपाधिर्निरूप्यते॥ ॥
तत्रोपाधिः साध्यत्वाभिमतव्यापकत्वे सति साधनत्वाभिमताव्यापकः॥ अनौपाधिकत्वज्ञानेयं च व्यापकत्वं तद्वन्निष्ठात्यंताभावाप्रतियो
गित्वं तत्प्रतियोगित्वे वाऽव्यापकत्वम्॥ मतियोगित्वं च तदधिकरणानधिकरणत्वमिति वदंति॥ तन्न॥ साधनपक्षधर्मावच्छिन्नसाध्यव्यापको
पाध्यव्याप्तेः॥ न च तयोरनुपाधित्वं दूषकताबीजस्य सत्त्वात्॥ मित्रातनयत्वेन श्यामत्वसाधने शाकपाकजत्वस्य प्रत्यक्षत्वस्य शास्त्रियत्वेन वा योः प्र
त्यक्षत्वे साध्ये उद्भूतरूपवत्त्वस्य च श्रावणत्वप्रयोजकत्वेनोपाधित्वस्वीकाराच्च॥ पक्षेतरेति व्याप्तेश्च॥ न च व्यतिरेके पर्वतेतरान्यत्वादिसाध्य इतरा
न्यत्वस्यासिद्धिवारणार्थं पर्वतपदं विशेषणमिति व्यतिरेकव्यर्थं च। शेषणत्वात् सउपाधिः॥ बाधोन्नीतस्यापि अनुपाधित्वापत्तेः॥

अ० चिं० तवैयापत्तिः॥ इतरान्यत्वस्याप्रसिद्धा विशेषणं विना व्याप्त्यग्रहे तत्सार्थकत्वात्॥ वस्तुगत्या साध्यव्यापकः पक्षेतर उपाधिरिति चेत्॥ अस्तु तथात
६ थापि पक्षातिरिक्ते साध्यव्यापकताग्रहाद्दूषकत्वं तच्च तत्राप्यस्ति॥ अथ पक्षे साध्यसंदेहादनुपाधित्वे उपाधिमात्रमुच्छिद्येत॥ विप
क्षाव्यावर्त्तकविशेषणशून्यत्वं विशेषणं तेन बाधोन्नीतपक्षेतरस्य परिग्रहः॥ तत्र पक्षस्यैव विपक्षत्वात्॥ ननु पर्वतेतरत्वादेरिति चेन्न॥ न
हि व्यर्थविपक्षाव्यावर्त्तकविशेषणशून्यत्वं सर्वत्र प्रमेयत्वादेः सत्वात्॥ तत्रोपात्तमिति विशेषणे सिद्ध्यसिद्धिभ्यां व्याघातः॥ नहि तत्रोपात्तं ते
न शून्यं च संभवति॥ तथापि च साध्यव्यापकत्वसाधनाव्यापकत्वे तत्र स्त इति तद्वादृत्वा पक्षे साध्याव्याप्तेरतो हेतौ व्यभिचार एव॥ व्य
भिचारे वाव रूपमुपाधिरिति वक्तेतर एव तत्रोपाधिः स्यात्॥ तव मात्रस्यैव दूषकत्वाच्च व्यर्थविशेषणम्॥ अत एवानुमानमात्रोच्छेदकत
याजातित्वान्नयपक्षेतरउपाधिरस्य पातसम्मदूषणासमर्थत्वं नजातित्वाभावात्॥ एतेन पक्षेतरत्वव्याहत्यर्थप्रकारांतरमपि निरस्तम्॥ उपाधि
त्वाभावेऽपि दूषणासमर्थत्वात्॥ अथोपाधिः स्वव्यतिरेकेण सत्प्रतिपक्षतयो दूषणं पक्षेतरत्वव्यतिरेकश्च न साध्याभावसाधकोऽसाधारण
त्वात्॥ ननु व्यभिचारोन्नायकतया दूषणम्॥ यथाहि साध्यव्यापको योऽध्याव्याप्यतया हेतोः साध्याव्याप्यत्वं तथा साध्यव्याप्यहेव्यापकतयोपा
धेः साध्याव्यापकत्वमपि सिध्येत्॥ व्याप्तिग्राहकस्योभयत्रापि साम्येन विशेषमनावहात्॥ तस्माच्च व्याप्तसाध्याव्याप्येन हेतुना साध्यं साधनी
यम्॥ तथा साध्यव्यापकोपाधिव्याहत्या साध्याभावोऽपि साधनीयः व्याप्तिग्रहणेत्याहितिदूषकताबीजम्॥ सोऽयं सत्प्रतिपक्ष एवेति॥ मैवम्॥ राम
एवं हि सत्प्रतिपक्षोपादानप्रद्वावननत्वात्॥ सत्प्रतिपक्षान्तरवत्॥ किंचैवं बाधोन्नीतेऽपि पक्षेतरो नोपाधिः स्यात्॥ व्यतिरेकेऽसाधारणत्वात्॥ न ६
ननु बाधेनोपाधिनियमः धूमेन हृदे वह्निसाधने तद्दर्शनात्॥ नच हेतुमति पक्षे वा धेयपक्षेतरउपाधिरिति नियम इति वाच्यम्॥ पर्वतस्थकेवह्नौ हेतकक्षे

नोनुष्णत्वसाध्ये अतेजस्त्वादेरुपाधित्वसंभवादिति चेत्॥ न॥ तेजोमात्रपक्षत्वे अतेजस्त्वे विनान्यस्योपाधेरभावात्॥ अपि च
पर्वतावयवपक्षत्वे न्यवपर्वतेतरद्रव्यत्वेन दृष्टे पर्वते संयोगानाधारत्वे न दृष्टपर्वतान्यत्वस्य उपाधित्वादेव व्यतिरेके असाधारण्या
भावात्॥ व्यतिरेकिणः सत्प्रतिपक्षसंभवाच्च न चासाधारण्येऽप्यपि सत्प्रतिपक्षो व्यापकत्वपादोषत्वात्॥ तस्मादुभयोरपि
व्याप्तिग्राहकसाम्ये विरोधान्न व्याप्तिनिश्चयः किंतूभयत्र व्यभिचारसंशयः तथाच व्यभिचारसंशयाधायकत्वेनोपाधेर्दूषकत्वं
तच्च पक्षेतरेऽप्यस्तीति तदुक्तोपाधेर्व्यभिचारसंशयकेति॥ भवतु वोक्तन्यायेन सकलानुमानभंगभयात्पक्षेतरे नोपाधिस्तथापि:
पिलक्षणम् अव्यापकमेव॥ नापि साध्यसमव्याप्तत्वे सति साधनाव्यापकत्वमुपाधित्वं दूषकतावीजस्य व्यभिचारोन्नयनस्य
सभ्रानियतस्य वासाम्येन विषमव्याप्तस्याप्युपाधित्वात्॥ नचाहूषकतायां साध्यव्याप्यत्वस्याप्रयोजकत्वाच्च॥ अथ साध्यप्रयो
जको धर्म उपाधिः प्रयोजकत्वं च न्यूनाधिकदेशवृत्तेः तस्मिन्सत्यभववत्वे तं विनापि भववस्तद्प्रयोज्यत्वात्॥ अन्यथा पक्षे
तरस्याप्युपाधित्वप्रसंगादिति चेत्॥ न॥ दूषणोपयिकं हि प्रयोजकत्वमिह विवक्षितं तच्च साध्यव्यापकत्वे सति साधनाव्याप
कत्वमेवेति च तदेव प्रयोजकं न लाघिकं व्यर्थत्वात्॥ ननु पासउच्यते यस्य धर्मोऽन्यत्र प्रतिबिंबितः यथा जपाकुसुमे स्फटिकलौहित्य
उपाधिस्तथावउपाधिवृत्ति व्याप्यत्वं हेतुत्वाभिमते च कास्तीति नासोऽउपाधिः नव व्याप्यत्वमात्रे दूषणत्वमिति साध्यव्यापकतादि
घटितत्वाच्च समव्याप्तत्वोपाधिरिति चेत्॥ न॥ किं विषमव्याप्तस्य दूषकताबीजाभावान्नोपाधित्वाद् वा चात्वे तथात्वेऽप्युपाधि
पदस्य च जातिनिमित्ताभावाद्वा॥ नाद्यः॥ तस्यापि व्यभिचारोन्नायकत्वात्॥ नापरः॥ नहि लोके समव्याप्त एवान्यत्र स्वधर्मप्रतिबि

अ॰ चिं॰ वञ्जनकत्वोपाधिपदप्रयोगः॥ लाभाद्यवच्छिन्नाहृताभित्यादौ लाभादावप्युपाधिपदप्रयोगात्॥ किं च न शास्त्रैकलौकिकव्य
१० वहारार्थमुपाधिव्युत्पादनं किंतु अनुमानदूषणार्थं तच्च साध्यव्यापकत्वे सति साधनाव्यापकत्वमात्रमिति शास्त्रतंत्रे वोपा
धिप्रयोगः॥ अन्ये तु पक्षमात्रव्यभिचारविरोधि सदुपाधिः न चाविषमव्याप्तस्याभावो व्यभिचारं विहाय साधकस्तस्याभावेऽपि व्यभिचा
त्॥ अपि ह्यनित्यत्वव्यापकं प्रमेयत्वं तद्व्याप्यं वस्तुत्वम्॥ न चानित्यत्वग्राहकत्वव्यापकतावच्छेदकमस्ति॥ समव्याप्तस्य तु व्यतिरेके तद्
व्याप्तिर्हि साध्यव्याप्यभूतस्य व्याप्यं व्यभिचरति॥ व्यभिचारित्वोक्तेः समव्याप्तस्यैवोपाधिः भेदे हि व्याप्यव्यापकत्वात्॥ साधनं व्यापक
त्वाच्च॥ अन्यथा कृतकत्वेनानित्यत्वे साध्ये कृतकत्वमुपाधिः स्यात्॥ अभेदेऽपि व्याप्यव्यापकत्वे साधनव्यापकत्वादिनुपाधि
त्वमिति त्वाच्च॥ तत्रान्तर्बाधहेतो व्यभिचारे साध्यव्याप्यव्याप्यत्वं तत्रेमाव्यापकत्वात्त्वावियावाच्च॥ न तु साध्यव्याप्यत्वमित्यत्रा
पि त्वनौपाधिकत्वं तदेव वाच्यम्॥ तथा चानवस्थेति॥ अनौपाधिकव्याप्यत्वमपि भवतेव व्यभिचारस्य दूषितत्वात्॥ न च सा
ध्यव्याप्यव्याप्यत्वमिथ्यानौपाधिकत्वे साध्यव्याप्यत्वमित्यत्रापि तन्नौपाधिकत्वं तदेव वाच्यम्॥ तथा चानवस्थेति॥ अनौपाधिक
त्वेन व्याप्तिलक्षणे वावद्विति साध्यव्यापके विशेषणं दत्तमेव॥ किं च पक्षेतरत्वं साध्यानुमितिर्न स्यादिति तदेव तत्र दूषणं न तु पक्षेतरके
भवत्येव सत्वदूरगर्भविहद्ध्वलादि पक्षवृत्तित्वाभावात्॥ बाधितपक्षधर्म्मावच्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधि
त्वं साध्यनावच्छिन्नसाध्यव्यापकोपाध्यर्थ इति नाशः॥ शब्दोऽभिधेयः प्रमेयत्वादित्यत्र श्रावणत्वस्योपाधित्वापत्तेश्च॥ ग्राह्यधर्म्मिणोऽत्व राम १०
दिक्लाभिधेयत्वेनत्रोक्तेपाद्योतत्रा श्रावणत्वे व्यापकं प्रमेयत्वस्य साधनस्याव्यापकं हि तत्॥ आर्द्रेन्धनवत्त्वादीनुपाधौ वह्नित्व

तताद्यधर्म्माभावाच्च॥ अथ साधनावच्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधित्वात् तेन ध्वंसस्य जन्यत्वेन ध्वंसप्रतियोगित्वे साध्ये साधनावच्छिन्नसाध्यव्या
पकोऽभावत्वमुपाधिः॥ श्यामत्वे शाकपाकजत्वमिति तत्र॥ पक्षधर्मावच्छिन्नसाध्यव्यापकोपाध्यव्यापनात्॥ जलं प्रमेयं रसवत्त्वादित्यत्र रसवत्त्वावच्छिन्नप्रमेयत्व
व्यापकपृथिवीत्वस्योपाधित्वप्रसंगात्॥ सोपाधित्वादसाधकमित्यत्र साधनावच्छिन्नसाध्यव्यापकमित्यभिधाने साधनावच्छिन्नत्वस्य वैयर्थ्यप्रसंगाच्च॥ किंच पक्ष
दूषेऽपि विशिष्टसाध्यव्यभिचारं विशिष्टसाध्यव्यतिरेकं वा साधयति वा पश्चात् केवलसाध्यव्यभिचारः केवलसाध्यव्यतिरेको वा साधनापत्तः तथा चार्थान्तरं केवल
साध्ये हि विवादो न तु विशिष्टे॥ अथ प्रमेयत्वसाध्यव्यभिचारो हि ध्यर्थ्यमेव विशिष्टव्यभिचारः साध्यतद् इति चेत्॥ न अप्रसक्तत्वात्॥ प्रथमं साध्यव्यभिचार एवो
न्नाप्यत्वं त्राप्ति सिद्धोऽनुपाधिरिति चेत्॥ तर्हि बह्वनुमानेनौपाधिर्दूषणं स्यात्॥ किं च प्रकृतसाध्यव्यभिचारहेतुत्वेन पक्षधर्मावच्छिन्नसाध्यव्यापकव्यभिचार एवो
पन्यस्तनीपोलोपाधिः स्यादित्यात्॥ पर्यवसितसाध्यव्यापकत्वे सति साधनाव्यापकः उपाधिः पर्यवसितसाध्यं च पक्षधर्मतावलभ्यं यथा शब्दोऽनित्यत्वातिरिक्ता
वृद्धधर्म्मातिरिक्तधर्म्मवान्॥ प्रमेयत्वादित्यत्र पर्यवसितसाध्यमनित्यत्वं तस्य व्यापकं कृतकत्वमुपाधिः॥ यादृश च तथैव हेतुकत्वमपि शब्दो साध्यते तथाऽनित्यत्व
मुपाधिः॥ इति केचिद्वा शुक्लसाध्यनियमव्युत्पत्तिविकल्पके ह्युपाधिरुद्भाव्यः॥ पर्यवसितं नियमं न दूषकतावीज साम्याद्यादिति अनेन पक्षधर्मतावच्छिन्नसाधनाव
च्छिन्नसाध्यव्यापकोपाधिः संगच्छते॥ तादृशसाध्यस्य पर्यवसितत्वादिति॥ तन्न॥ एवं हि द्व्यणुकस्य सावयवत्वे सिद्धे द्व्यणुकमनित्यं द्रव्यासमवेतत्वे सत्यमहत्
त्वानधिकरणद्रव्यत्वादित्यत्रानित्यशरीरद्रव्यासमवेतत्वमुपाधिः स्यात्॥ भवति हि नित्यद्रव्यासमवेतत्वे पर्यवसितं साध्यं तस्य व्यापकं साधनाव्यापकं च किं च
पक्षधर्मतावच्छिन्नत्वेनान्यसाध्यसिद्धौ तिष्ठत्वनुपाधिः॥ तदसिद्धौ च कस्य व्यापकः॥ न हि सोपाधौ पक्षधर्मतावलात् साध्यसिद्धाविति यद्व्यापकः
उपाधिः स्यादिति॥ अत्रोच्यते॥ यद्व्यभिचारित्वेन साधनस्य साध्यव्यभिचारित्वं स उपाधिः॥ तच्छरीरं तु पर्यवसितसाध्यव्यापकत्वे सति साधनाव्या
पकत्वं पक्षधर्मावच्छेदेन साध्यं प्रसिद्धं तदवच्छिन्नं पर्यवसितं साध्यम्॥ स च धर्मः क्वचित् साधनमेव क्वचिद्द्रव्यत्वादि॥ क्वचिन्महानसत्वादिः॥

११ तथा हि समव्याप्तस्य विषमव्याप्तस्य वा साध्यव्यापकस्य व्यभिचारिणा साधनस्य साध्यव्यभिचारः स्फुट एव व्यापकव्यभिचारिणो व्याप्यव्यभिचारि
त्वनियमात्॥ साधनावच्छिन्नपक्षधर्मावच्छिन्नसाध्यव्यापकयोः व्यभिचारित्वेन साधनस्य साध्यव्यभिचारित्वमेव यथा ध्वंसो विनाशीत्यत्र
भावत्वस्य वायोः प्रत्यक्षत्वे साध्येऽनुद्भूतरूपवत्त्वस्य विशेषणाव्यभिचारिणा साधने विशिष्टव्यभिचारस्य विशेष्यव्यभिचारित्वनियमात्॥ अत
एव नाप्यनित्यत्वं विशेषणाव्यभिचारित्वेन ज्ञाते साधने विशिष्टव्यभिचारः सिध्यन् विशेष्यव्यभिचारमादायैव सिध्यति पक्षधर्मताबलात्॥
अन्यथाप्रतीतेरपर्यवसानात्॥ न च यत्र पक्षधर्मताबलादत्र तत्साध्यसिद्धौ अप्यन्वितत्वम्॥ यद्वा प्रत्यक्षस्य रूपाश्रयत्वं प्रत्यक्षत्वव्यभिचारि
व्यभिचारित्वे सति द्रव्यप्रत्यक्षत्वव्यापकव्यभिचारित्वान्महत्त्ववत्॥ तथा मित्रातनयत्वं श्यामत्वव्यभिचारि मित्रातनयत्वाव्यभिचारित्वे सति श्या
ममित्रातनयत्वव्यापकव्यभिचारित्वात्॥ अथ घटत्वे तदभिचारस्वितत्समानाधिकरणात्यन्ताभावाप्रतियोगित्वान्न चाभेदात्॥ पक्षद्वयः सा
धनव्यभिचारि साध्यव्यभिचारी व्यापकः स उपाधिः तत्संग्रहात्पर्यवसितनाप्यनिरस्य॥ किं चार्थान्तरस्य पुरुषदोषत्वादाभासावस्थत्राभा
वादुपाधिविभावनादिकं दोषः॥ न चैवं शब्दोऽभिधेयः प्रमेयत्वादित्यत्राश्रावणत्वं जन्यत्वं प्रमेयं स एव त्वादित्यत्रापि वाच्यमुपाधिः स्यादिति वाच्यम्
केवलान्वयित्वसाधकप्रमाणेन तत्र साध्यसिद्धेरुपाधेर्व्यभिचारिसाध्याव्यापकत्वात् न च पक्षेतरत्वं व्याप्यतकत्वेन तदुपाधावतिव्याप्तिः॥ अनुकूलत
र्काभावेन साध्यव्यापकत्वानिश्चयात् सहचारदर्शनादेश्च तेन विनापि अव्यापकत्वादिपुरुषवाधोन्नीतेवानुकूलतर्कोऽनवस्थेवानेवं पर्वतात्वमपव्हेत्पन्यत्वादि
रपि नोपाधिः स्वं पक्षमात्रव्यावर्त्तकविशेषणवत्वात् अत एव धूमे आर्द्रे न प्रभववह्नित्वं बहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वेऽरतरूपवत्त्वं मित्रात राम
नयत्वावच्छिन्नश्यामत्वे शाकपाकजन्यत्वं जन्यत्वावच्छिन्ने विनाशित्वे भावत्वमुपाधिः तदुत्कर्षेणासाध्योत्कर्षादिनन्यथासिद्धान्त्वयवा ११

त्ति रेकतो वैधकाकारणतावामेन घटे मज्ञानप्रसंगेन च साध्यव्यापकतानिश्चयात्॥ तर्को कार्यकारणयोरेव व्याप्ति स्वत्वाच बहुव्याकुलाप्यात्तदिति चेन्न॥
तदुपजीव्याऽन्येषामपि अनुकूलतर्केण व्याप्तिग्रहात्॥ यत्र साध्योपाध्योर्हेतुसाध्ययोर्व्याप्तिग्राहकस्यान्यात् नैकत्रव्याप्तिनिश्चयस्तत्र संदिग्धोपाधि
त्वं व्यभिचारसंशयाधायकत्वात्॥ यदा च तादृशोपि कत्रानुकूलः शक्तौ वतारसंदिग्धहेतुत्वमुपाधित्वं वानिश्चितं॥ यत्रेतरस्य स्व व्याघातकत्वेन न हेतुव्यभि
चारसंशयाधायकत्वमतीन संदिग्धोपाधिः विषयतु यत्रेतरस्य यथा साध्यव्यापकत्वं तथा साध्याभावव्यापकत्वमपि व्याप्तिग्राहकसाम्यात्॥ तथा
चोभयव्यापकनिवृत्त्या पक्षे संदिग्धतदभावप्रतिनिवर्त्तितव्यम्॥ न चैवं तथा च पक्षेतरः साध्यव्यापकतासंशयेन स्वयं संदिग्धः पक्षेकपदे दूषणदिति
तन्न॥ तथापि हि साध्यव्यापकत्वमात्रेव हेतुव्यभिचारशंकाधायकत्वेन दूषणत्वस्यादेव॥ ननु यत्रोपाधिस्तत्रानुकूलतर्कोनास्तितदा तदभावाद्देवव्या
सत्त्वेहः अव्याप्तितदा साध्यव्याप्यत्वेनोपाधेः साध्याव्यापकत्वानिश्चयान्नोपाधिः प्रभयथापि नोपाधिर्दूषणं नव्याप्यभावव्याप्यमुभय
मतदुपाधिरपि तदभावोन्नयनं न हेत्वः इति व्याप्यमाउपधिरात्मलाभार्थमनुकूलतर्काभावोपजीवकत्वेन तस्यैव दोषत्वादिति चेत् न। सोपाधावेक
त्र साध्यतदभावसंबंद्धस्य वितरद्वाहवच्छेदभेदेन तदुभयसंबंधो वाच्यः॥ तथा च साधने साध्यसंबंधितावच्छेदकरूपविशेषणामुपाधिरेव
व्यापकः तथा च अनुकूलतर्काभावो व्याव्यापकद्व्यभयोरपि विगमकाभावेन दूषकत्वमात्र अन्येतुयत्र व्याहत्यापरस्य साधनस्य साध्यं निवर्त्तते स धर्मो
स्तत्र हेतावुपाधिः स च धर्मो यस्याभावात् पक्षे साध्यसाधनसंबंधाभावः यथा आर्द्रेन्धनवत्त्वं व्यावर्त्तते हि तत्रारूपाधूमवत्त्वमयोगोलके॥ अत
एव तत्र साध्यसाधनसंबंधाभावः॥ यत्रैवं भावत्वव्याहत्या ध्वंसे जन्यत्वानित्ययोः संबंधो निवर्त्तमानः पक्षधर्मताबलादनित्यत्वाभावमादा
य सिध्यति॥ यथा वा वायुरुद्भूतरूपवत्त्वं निवर्त्तमानं द्रव्यत्वे सति प्रत्यक्षत्वानिवर्त्तयत् प्रत्यक्षत्वाभावमादाय सिध्यति॥ तथा चोभयत्रापि यत्रे

अ०चिं०मू० साध्याभावसिध्या साध्यस्य धर्मेतरत्वेऽध्याभावो नास्तीति अत एवाबाधानुन्नीतपक्षेतरस्यानुपाधित्वं व्याप्यव्यापकत्वेन तद्व्यतिरेकस्य साध्याव्यावर्तकत्वा-
दिति॥ यत्तूपाधिमात्रस्य लक्षणं व्यतिरेकिधर्मित्वं पक्षेतरोऽपि क्वचिदुपाधिः तन्मदुपाधेरन्यत्र साध्यव्यापकत्वे सति तत्साधनाव्यापकत्वम्॥
१२ न च धूमवद्विहिंसात्वं धोपाधिः पक्षेतरत्वेस्यादिति वाच्यम्॥ अप्रयोजकत्वात्तैरिति॥ अनुमितिप्रतिबंधकज्ञानविषयतावच्छेदकरूपाद्युपाधित्व-
मिहतिरूप्यम्॥ तच्च न व्यतिरेकिधर्मत्वपतिप्रसंगात्॥ विशेषणत्वहेतुनुवह्निधूमत्वं वंधे पक्षेतरत्वस्योपाधित्वप्रसंगाच्च॥ केचित्तु॥ साधन-
व्यापको व्युपाधिः क्वचित्पत्रपक्षादृष्टिहेतुः पाकरकारणविवोकठिनसंयोगत्वादिति अनुष्णाशीतस्पर्शवत्वम्॥ न च तत्र स्वरूपासिद्धिरेव
दोषइतिवाच्यम्॥ सर्वत्रोपाधेर्दूषणान्तरसंकरादित्याहुः॥ साध्यं च नोपाधिः व्यभिचारसाधने साध्यविशिष्टत्वात्॥ अनुमितिमात्रोच्छेदप्रसंगा-
च्च॥ स चायं द्विविधः निश्चितः संदिग्धश्च साध्यव्यापकत्वेन साधनाव्यापकत्वेन च निश्चितो व्यभिचारनिश्चायकत्वेन निश्चितोपाधिः य-
थावह्निमत्वेन धूमवत्वे साध्ये आर्द्रेन्धनप्रभववह्निमत्वं यत्र च साधनाव्यापकत्वसंदेहो वा साध्यव्यापकत्वसंदेहो वा उभयसंदेहे वा तत्र हेतुव्यभिचा-
रसंशयाधायकत्वेन संदिग्धोपाधिः यथा मैत्रीतनयत्वेन श्यामत्वे साध्ये शाकाद्याहारपरिणतिजत्वं न चैतेन पहेतुना शाकपाकजत्वमपि साध्यं तत्र
श्यामत्वस्योपाधित्वात् उभयस्यापि साधने चार्थांतरं श्यामत्वमात्रे विवादेन मूमयत्रा॥ न चैवं धूमाद्वह्न्यनुमानेऽपि वह्निसामग्र्युपाधिः स्यात्
॥ तत्र वह्निनैव तत्सामग्र्यापि संदेहधूमस्यासोपाधिकत्वनिश्चयात् अत्र तु मैत्रीतनयत्वव्याप्यश्यामत्वसामग्र्या स्यात् व्यभिचारं यत्र कार्यकारणभावा
दीनां व्याप्तिग्राहकप्रमाणाभावात्॥ अतएव साध्यसामग्र्या सहयत्र हेतोरपि व्याप्तिग्राहकमस्ति तत्र सामग्री नोपाधिः यत्र तु तन्नास्ति तत्र सामग्र्यपि रमा
उपाधिः इत्यपि संधायसामग्री क्वचिन्नोपाधिर्न तु सर्वत्रेष कंपयापि तुल्यवागचेमपीह उपाधेः साध्यव्यापकतासंदेहे ईश्वरानुमाने शरीरजन्यत्वानुमा १२

नादिः यथा शाकपाकजन्यत्वस्य साध्यव्यापकतासंदेहे मैत्रीतनयत्वे॥ यत्तूपाधिसंदेहो नोपाधिर्नैव हेत्वाभासांतरमिति तदुभयवनेभिन्नेपोत्पानु-
योगइति॥ तत्र॥ संदिग्धानैकांतिकवत् व्यभिचारसंशयाधायकत्वेन दूषणत्वात्॥ उपाधिरिव व्यभिचारनिश्चयाधायकत्वेन॥ इदानीमुपाधेर्दूषक-
तावीजं विचार्यते॥ नास्य स्वव्यतिरेकद्वारा सत्प्रतिपक्षतया दूषकत्वम्॥ तद्धि हि सत्प्रतिपक्षोपाध्युद्भावने नस्यात् न च प्रतिपक्षवादुल्येना-
धिकबलार्थमुपाध्युद्भावनं तत्समयं धर्मानयस्यापि तत्संपातात्॥ एकेनापि बहूनां प्रतिबंधसंभवाच्च॥ व्याप्तिपक्षधर्मताहि बलं तच्च तुल्य-
मेव॥ न तु भूयस्त्वमपि एकस्मादनुमित्युत्पत्तेः॥ संदिग्धोपाधेर्दूषकत्वापाताच्च॥ तद्व्यतिरेकस्य पक्षे संदिग्धत्वात्॥ अपि चैवं बाधोन्नीतप-
क्षेतरस्योपाधित्वं न स्यात्॥ व्यतिरेकेऽसाधारणत्वात्॥ पक्षवृत्तिश्चोपाधिर्न स्यात्॥ यथा शब्दोऽनित्यो द्रव्यत्वादित्यत्र कार्यत्वं अन्यकारोद्-
यं प्रत्यानेत्रेण प्रतीयमानत्वादिरूपं चाक्षुषत्वं तद्व्यतिरेकस्य पक्षावृत्तित्वात् न च नायमुपाधिः तल्लक्षणसत्वात् अन्यथापि दूषकत्वसंभवा-
च्च॥ किंच साध्यव्याप्यव्याप्यत्वेनोपाधेः साध्यव्यापकत्वेन व्यतिरेके एकपक्षस्य प्रतिपक्षः न च व्यापकव्यतिरेकोऽदृव्याप्यव्यतिरेकः॥ नापि व्या-
प्तिविरहरूपतया असिद्धत्वेनानौपाधिकत्वस्य व्याप्तित्वनिरहात्॥ यत्नोपाधिकत्वज्ञानस्य व्याप्तिज्ञानकारणत्वेन व्याप्तिज्ञानकारणविघटक-
तया व्याप्यत्वासिद्धिं तत्र भविः न वा अन्यस्य साध्यव्यापकत्व साधनाव्यापकत्वज्ञानमन्यस्य व्याप्तिज्ञाने त्वतः प्रतिबंधकमिति युक्तम्॥ न च साध्य-
व्यापकाव्याप्यत्वज्ञाने विद्यमाने साध्यव्याप्यत्वज्ञानं नोत्पत्तुमर्हतीति वाच्यं॥ न हि साध्यव्यापकव्याप्यत्वज्ञानं व्याप्तिज्ञाने कारणं येन प्र-
तिबंधकं स्यात्॥ किंतु साध्यव्यापकव्यभिचारित्वेन साध्यव्यभिचारित्वज्ञानद्वारा नापि व्यभिचारोन्नायकत्वेन यथाहि साध्यव्यापकव्यभिचा-
रितया साधने साध्यव्यभिचारित्वमनुमेयं तथा साध्यव्याप्यव्यभिचारित्वेन साध्यव्यभिचारित्वमनुपाधेरनुमेयं व्याप्तिग्राहकसामग्र्यात्॥ नापि

अ०वि०प्र० साध्यव्यापकाव्याप्यत्वेन व्याप्तिग्राहकत्वात् तथा साध्यव्याप्यव्यापकत्वेनोपाधेरेव साध्याव्यापकत्वसाधनात् तस्मादुपाधेर्हे
त्वाभासान्तरमिति॥ उच्यते॥ आर्द्रेन्धनवत्त्वादेर्धूमादिना साध्यव्यापकत्वसाधनाव्यापकत्वे निश्चिते दूषकताबीजचिन्तनपदि:
१२ हि साध्यसाधनसहचारादिदर्शनेनोपाधौ साध्यव्यापकतानिश्चय एवं नाशित्वादौ उपाधित्वनिश्चयाभावेन दूषणतेत्याशयेना
लौकिकबहिर्भावकितभावचिन्ता॥ किंच सम्प्रति पक्षेतरव्याप्यत्वासिद्धतया त्वां तत्र गणयाम्यदिदूषणं त्वेन साध्यव्यापकतानिश्चयो
वाच्यः॥ तेन विना तेषामसंभवात् तस्मादुपाधेः सत्प्रतिपक्षः तत्सहायाश्चायमिति व्यभिचारज्ञानद्वारा साध्यव्यापकाव्याप्यत्वेन व्याप्ति
विरहोन्नायकतया वा दूषकत्वम्॥ यद्वा साध्यव्यापकाभाववद्वृत्तितया साध्यव्यभिचारित्वमुन्नेयं न च साधनाभाववद्वृत्तित्वमुपाधौ
ति वाच्यम्॥ उपाधिपोषामात्रोच्छेदप्रसंगात् तस्मात् प्रतिपक्षे पूर्वं साधनव्यतिरेकवत्त्वः॥ अहत्ति गगनादौ साध्याव्यापकत्वात्॥ संयोगादौ हेतोर्व्या
साधनत्वाव्यापकत्वाच्च॥ अथोपाधेराभासाः अहाधारणाविपर्ययः यथा अन्वयव्यतिरेकिणि साध्यवाधोन्नीतान्यवहेतर॥ अप्रसिद्धसा
ध्यविपर्ययः यथा केवलान्वयिनि साध्ये पक्षेतरत्वादिः॥ बाधितसाध्यविपर्ययः यथा वह्निरनुष्णः कृतकत्वादित्यत्रानुकृतकत्वम्॥ पक्षाव्या
पकविपर्ययः॥ यथा क्षित्यादि सकर्तृकं कार्यत्वादित्यत्राणुत्वव्यतिरिक्तत्वं अत्राणुत्वव्यतिरिक्तत्वव्यतिरेकस्य क्षित्यादेरेकदेशे व्याव
त्वाभावासिद्धेः॥ एवं साधनव्यतिरेकः यथा शब्दोऽनित्यः अनित्यवृत्तिगुणत्वात् समानित्यपरसमवेतेन्द्रियजन्यनिर्विकल्पकविषयत्वाद्वद्वि राम
त्यादौ पूर्वं साधनतापाः प्रयोगानुरोधित्वेनाव्यवस्थितत्वात् मूर्तिकादौ चित्रिसत्त्वसाधनव्यतिरेकस्योपाधित्वं यत्र क्वचिदनित्यत्वसाधनव्यति
कस्येति व्यक्तव्यवस्था न स्यात् उपाधौ नित्यदोषत्वात् न हि पक्षेन सोपाधि संवद्धते नानुवाधिकसंवद्धं संभवति॥ न च सत्प्रतिपक्षोच्छेदः एवं १२

साधनव्यतिरेकस्यानुपाधित्वे वीजमिति वाच्यं स्यात्पक्षतायाः प्रत्याभासत्वं तत्र पूर्वं साधनव्यतिरेकस्य साध्याव्यापकत्वेनानुपाधित्वात् न च प
क्षे हेतोः लत एवासाधकत्वात् सत्प्रतिपक्षवैयर्थ्यं तत्रेति वाच्यम्॥ अग्रे वक्ष्यमाणविशेषदर्शनेन सत्प्रतिपक्षत्वसंभवात्॥ एवं साधनव्याप्य
व्यतिरेकः यथा कृतकत्वानुमाने नित्यत्वादिः पक्षविपक्षान्यतरान्यः यथा प्रसिद्धानुमाने पर्वतजलहृदान्यतरान्यत्वम्॥ पक्षेतरसाध्या
धारः यथात्रैव पर्वतेतरत्रिमत्वेन चात्र व्यर्थविशेषणत्वं दूषणं तत्त्वेऽपि उपाधेराभासत्वात्॥ तत्तत्पक्षीयत्रैव पर्वतेतरेन्धनवत्त्वम्॥
एवं वह्निसामग्र्यादिकमप्यूह्यम्॥ व्याहत्युपाधिः॥ व्याहत्यनेनास्य हेतुधर्म्मतानिरूप्यते॥ तत्र न तावत् संदिग्धसाध्यधर्म्मत्वं पक्षत्वम्॥ संदेहो
हि न विशेषणयोत्तन्तीपूर्वलिंगदर्शनव्याप्तिस्मरणादिनातस्यनाशात्तेनोपलक्षणम्॥ अव्यावर्त्तकतापत्तेः॥ नापि साधकबाधकप्रमाणा
भावः उभयाभावस्य प्रत्येकसत्त्वेऽपि सत्त्वात्॥ नापि भावद्वयं तथा बाधकप्रमाणाभावस्य व्याप्यत्वात्॥ दृष्टेः पक्षत्वेऽपि बाधहेत्वसिद्ध्यादेराव
श्यकत्वेनानुमित्युत्पादात्॥ नापि साधकप्रमाणाभावः श्रोतव्यो मन्तव्य इति श्रुत्या समानविषयकश्रवणेनेतरंमननबोधनात् प्रत्य
क्षदृष्टेऽपि अनुमानदर्शनात् एकलिंगावगमेऽपि लिंगान्तरेण तदनुमानाच्च मंतव्यश्चोपपत्तिभिरिति स्मरणात्॥ अथ सिषाधयिषितसाध्यध
र्म्मी धर्म्मी पक्षः॥ तथा हि मुमुक्षोः शास्त्रात्मावगमेऽपि मननरूपमोक्षोपायत्वेन सिषाधयिषाविरोषानुमितीच्छयोपायानुमानम्॥ अत एव प्रत्यक्षपरिक
लितमप्यर्थमनुमानेन बुभुत्सन्ते तार्क्किका इति का: न हि करिणि दृष्टे चीत्कारेण तमनुमिमते अनुमातार इति वाचस्पतिवचनयोर्विरोधः अनुमितिसिद्धि
रहस्योत्तदुपपत्तेरिति चेन्न॥ संदेहवत्परामर्शपूर्वं सिषाधयिषाया अप्यभावात् योग्यतायाश्चानिरूपणात् सिषाधयिषाविरहे विघनागमि
तेनमेघानुमानात्॥ त्वकारणाधीनलिंगपरामर्शबलेनानपेक्षितानुमानदर्शनाच्च॥ उच्यते॥ सिषाधयिषाविरहसहकृतसाधकप्रमाणाभावो यत्रा

सपक्षात्तेन सिद्धसाधनं बाधो वा विरहः सत्ते साधकप्रमाणाभावात् ज्ञाप्तिरूपपक्षः पक्षसाधकप्रमाणे सति अत्र सति वा सिद्धसाधनं वा प्रागुपस्थिते ऽभावात्तत्र विशि-
१४ ष्टाभावात्तथा स्वयं च विपक्षात्तस्य केवलान्वयित्वान्नास्यभेदकत्वं तथापि विपक्षस्य प्रसक्तिनिमित्तमुक्तमसंभवे इति पक्षतावच्छेदकस्य व्याप्तिविशिष्ट- अथपरामर्श
ज्ञानमनुमितिहेतुः॥ ननु व्याप्यतावच्छेदकप्रकारेण व्याप्तिस्मरणोपनीतपक्षधर्मताज्ञानं तथा लाघवात् परामर्शहेतुत्वेनावश्यकत्वाच्च॥ एवं च धूमो वह्निव्या-
प्यो धूमवांश्चायमिति ज्ञानद्वयादेवानुमितिरस्तु न चानुमितिं प्रति व्याप्यत्वज्ञानमेव हेतुर्लाघवात् आवश्यकत्वात् उपनीतव्यक्त्या चेति वाच्यम्॥ तस्यानुमितेः
पूर्वमसिद्धौ युगपदुपस्थित्यभावात्॥ अथ यथा तत्तद्विशिष्टस्मरणोपनीत इन्द्रियसन्निकर्षे सर्वदा परामित्यभेदप्रत्यक्षं भवति॥ तथेन्द्रियसन्निकृष्टे धूमे
वह्निव्याप्यधूमस्मरणे धूमवत्तावगाहनाद्धर्मिणीन्द्रियनिरुद्धवह्निव्याप्योऽयमित्यभेदप्रत्यक्षं स्यात्॥ सामग्र्या बलवत्त्वादिति तदेवानुमितिहेतुरिति चेन्न॥ प्रत्यक्ष-
सामग्रीतोऽनुमितिसामग्र्या बलवत्त्वात् अनुमितिरेवोत्पद्यते॥ ननु व्याप्याभेदप्रत्ययस्यानपेक्षत्वादपि परामर्शानन्तरं परामर्शान्तरं तद्द्वयं वस्तुतो वा भवेत् न त्वनु-
मितिः॥ अथ धूमो वह्निव्याप्य इति स्मरणतः पर्वतीयधूमेन्द्रियसन्निकर्षे प्रत्यक्षमेव व्याप्तिधूमत्वयोर्वैशिष्ट्यं तत्र भासते विशेष्यज्ञानस्य वैशिष्ट्यत्वात्
तत्र पक्षत्वासत्वात्। वह्निव्याप्यवानयमिति ज्ञानं तत्रोभयत्रापि लाघवात् पक्षधर्मव्याप्यत्वज्ञानस्य हेतुत्वकल्पनात् अन्यत्रापि तथेति चेन्न॥ इन्द्रियासन्निकृ-
ष्टेऽतीन्द्रिये च लिङ्गे प्रत्यक्षविशिष्टज्ञानसामग्रीविरहात्तेन विनाऽनुमित्यनुत्पादापत्तेः॥ अमृतुकसामग्र्या अत्रापि सत्त्वात्॥ न चानुमानान्तरपरामर्श-
अनवस्थानात्॥ अथ यथा सुखादेवदत्तो गौरो न वेति परमाणुरूपाधिकरणं न वेति संशयो बहिरस्वातन्त्र्येणापि मनसा कोटिस्मरणाविरोधादर्शनादिसह-
कारिविरणात् जन्यते॥ यथा वानिद्रासहकारेण बाह्यस्वप्नानुभवस्तरन्तः सेक्ष यथा स्वप्नानुभवदर्शनात्तथेहापि ज्ञाततोपनीतविशेष्य व्याप्तिस्मरण राम
सहकृतेन मनसा यथा परामर्शो जन्यते तेनैव तदुत्तरमनुमितिर्दर्शनादिति चेत्॥ न॥ व्याप्तिस्मरणादेः प्रमाणान्तरतापत्तेः तदेव हि प्रमाणान्तरं यदसाधारणं सहका- १४

री साधनं नो बहिर्गोचरं प्रमां जनयति यथेन्द्रियादि॥ संशयस्वप्नौ तु न प्रमे इति न निमित्तादेः प्रमाणान्तरत्वं न च तथापि कथं स धूमो वह्निव्याप्य इ-
ति व्यवहारस्तदानीं तद्व्याप्यत्वानुभवकाभावादिति वाच्यं। तत्र स्मृत धूमे धूमत्वेन वह्निव्याप्यत्वानुमानात्॥ न च तन्मते धूमत्वेन व्याप्यत्वानु- नि॰
भवः संभवति॥ अत एव योऽयं वह्निव्याप्यवान् सोऽयं वह्निमानिति व्याप्तिज्ञानवतोऽनुमितिर्न स्यात्॥ अथ पर्वतीयधूमे धूमत्वेन ज्ञाते धू-
मो वह्निव्याप्य इति नाविशिष्टसंशयेऽपि अनुमितिः स्यादिति चेन्न। धूमो वह्निव्याप्य इति स्मरणे विद्यमाने धूमत्वाज्ञानस्य विरोधदर्शनेनसं-
शयाभावात्॥ अन्यथा परामर्शोऽपि कुतो न स्यात्। संशयेन प्रतिबंधादिति चेत्तुल्यम्॥ न च सामान्यनिश्चयस्य सामान्यसंशयनिवर्तक-
त्वाद्धूमसामान्ये संशयो मा भूत् विशेषसंशयस्त्वविरोधविशेषदर्शननिवर्तनीय इति धूमविशेषे संशयनिराकार्यतया व्याप्तिनिश्चयो वाच्य
इति वाच्यम्॥ यत्र हि यद्यावदनेकधर्मदर्शने तत्र न तत्संशयः तच्च सामान्यविरोधे वेति॥ वस्तुतस्तु धूमत्वप्रकारेण व्याप्तिस्मरणे पक्षध-
र्मताज्ञाने चानुमितिर्भवत्येव। ननु भावोऽभावो वा उभयथापि प्रमेयमित्यत्र भावत्वाभावत्वयोर्व्याप्यतावच्छेदकयोरग्रहात्॥ तदन्यान्यत्वरूप
स्यान्यतरत्वस्य लिङ्गत्वाभावादिति चेत्॥ न॥ भावत्वाभावत्वान्यान्यधर्मवत्त्वस्य लिङ्गत्वात् एवं धूमालोकान्यतरत्वमपि लिङ्गम्॥ अन्व- व्या॰
यव्यतिरेकज्ञानं यदुत्पत्तिप्रतिबंधकं तत्तल्लिङ्गपरामर्शं न व्या च पक्षधर्मस्य व्याप्यभेदज्ञानमनुमितिप्रतिबंधकमतो व्याप्याभेदज्ञानं तद्धे-
तुः सिद्धान्ते इति चेन्न धूमत्वपुरस्कारेण व्याप्तिस्मरणोपनीतधर्मताज्ञाने सति विरोधदर्शनाल्ल धूमे व्याप्यभेदज्ञानं किन्तु अनुमितेरेव तत्रो-
त्पत्तेः तत्सामग्रीसत्त्वात् अतो न व्याप्याभेदज्ञानमनुमितिप्रतिबंधकं येन व्याप्याभेदज्ञानं तद्धेतुः स्यात्॥ न च धूमत्वपुरस्कारेण व्याप्तिस्मरण-
पक्षधर्मताज्ञाने इयं धूमव्यक्तिर्वह्निव्याप्येति व्याप्यतोऽनुमित्या परामर्शो विशिष्टज्ञानं हेतुरिति वाच्यम्॥ धूमत्वस्य विरोधस्य दर्शने

अनुमानं नस्यात् ६

१५ नतादृशाक्रमानुत्पत्तेः तत्रानुमितित्वं भवादिव अन्यथानिश्चयसामग्र्यां सत्यां परामर्शादनंतरं परामर्श एव कुतो न भवति ॥ अस्तु वा व्याप्य
तयापक्षधर्मतया वा व्याप्तस्य मिश्राग्रह एवानुमितिहेतुः ॥ परामर्शहेतुतया तस्यावश्यकत्वात् ॥ अत एव आलोकवद्धूमज्ञाना
दनुमितिः न चैवं गौरवं तद्वाविशिष्टज्ञानस्यानुपस्थितेः न च जनकज्ञानाविरोधिनो ज्ञानस्याप्रतिबंधकत्वान्निश्चयग्रहो न प्रतिबंध
क इति वाच्यं अभेदज्ञानस्याजनकत्वात् तथापि लिंगपरामर्शे तादृशस्य प्रतिबंधकत्वकल्पने गौरवात् ॥ अपि गोत्वं हि मधुरत्वावांतरजातिर्वा
लिंगं न स्यात् तद्धर्मानवच्छिन्नत्वाभावात् ॥ किंतु एव तस्य विलक्षणत्वादिति चेन्न ॥ व्यक्तेरेव तत्र प्रकारत्वात् ॥ न हि गोत्वमिति ज्ञाने नयोर
विशेषः अन्यथा गोत्वमिति ज्ञानस्य निर्विकल्पकत्वापत्त्या व्याप्यत्वग्रहे परामर्शेऽप्यानुपपत्तेः ॥ एवं तर्हि जातित्वेऽसति सकलगोवृत्तित्वं
गोत्वमिति अनुभवाच्च न चैवमनवस्थाताद्धर्मादिवृत्तित्वेऽसति तद्वृत्तित्वस्यानुभवेनापलापासंभवादिति ॥ अन्ये तु ॥ अथ मालोको धूमो
वा उभयथापि वह्निव्याप्य इति ज्ञानं ततोऽनुमितिः ॥ न चैवं धूमत्वेनालोकत्वेन वा तत्र निश्चयः अपि तदन्यान्यत्वमेव तत्र लिंगं न च तत्
ज्ञानदशायामपि अनुमितिदर्शनात् न तत्थेति वाच्यम् ॥ धूमालोकान्यान्यत्वज्ञानं विना तत्त्वापि तत्र व्याप्यत्वानिश्चयेन तद्वैयर्थ्यं तद्व्य
व्यावर्तकत्वादिति चेन्न ॥ न हि धूमालोकान्यान्यत्वं धूमान्यान्यत्वं वा व्याप्यतावच्छेदकं गौरवात् व्यभिचारवारकविशेषणवत्त्वाच्च किंतु
धूमत्वादिकं तच्च तत्र संदिग्धमेव ॥ ननु तत्तदन्यान्यत्वं वह्निव्याप्यमेव व्यभिचाराभावेन व्याप्तिविरहसाधकस्याभावात् ॥ पुरुषांतरेऽपि
नीलधूमवत्त्वादिकं वा अधिके न निगृह्यते तेन तु व्याप्यत्वासिद्धेः इति चेत् न तत्तदन्यान्यधूमालोकत्वरूपमेव तच्च व्याप्यमिति संसर्ग राम
वदव्याप्यव्याप्यज्ञानादनुमितिरिति प्रसंगात् किंतु व्याप्यतावच्छेदकप्रकारकज्ञानात् ॥ न चैवं तदन्यान्यत्वं वह्निव्याप्यतावच्छेदक १५

प्रकारकं ज्ञानं ॥ न च तत्तदन्यान्यत्वं वह्निव्याप्यतावच्छेदकमित्युक्तम् ॥ न चैवं तदन्यान्यत्वात् वह्निव्याप्यत्वमपि तत्र नानुमेयं वैयर्थ्यविशेष
णत्वादिति वाच्यम् ॥ प्रत्यक्षे हि तत्र तदन्यान्यत्वविशेषदर्शनात् व्याप्यत्वज्ञानं तत्र न पाति ॥ विशेषणज्ञानविशेषणविशेष्यसंबंधवि
शेषणाविशेष्ययोः सन्निकर्षात् तद्दर्शनाग्रहविशेषदर्शनानां वह्निव्याप्यत्वप्रत्यक्षसंभवात् ॥ न चैवं प्रत्यक्षेऽपि तदन्या
न्यत्वज्ञानं सहकारीति वाच्यम् ॥ अन्वयव्यतिरेकाभ्यां गुरोरपि विशेषदर्शनत्वेन प्रत्यक्षसहकारित्वात् ॥ तस्मात् तदन्यान्यत्वज्ञानं
तत्र व्याप्यताज्ञानोपक्षीणं न तु साक्षादनुमितिहेतुरिति किंच वह्निव्याप्यवान् अयमिति शाब्दज्ञाने व्याप्यत्वज्ञानं कारणमिति अन्यत्रापि
तथा ॥ अथ वह्निव्याप्यत्वमपि वह्निव्याप्यतावच्छेदकम् ॥ तथा हि ॥ वह्निनिरूपिता धूमादिप्रत्येकवृत्तिर्व्याप्तिर्व्याप्तित्वेन सकल
धूमादिवृत्तिव्याप्यतावच्छेदिका अपमेदेनावच्छेदकमेदेन च व्याप्तिभेदादिति चेत् ॥ न ॥ सकलधूमादिवृत्तिव्याप्तेरमानाभावा
त् ॥ यत्र वह्निव्याप्यं तत्र वह्निरिति व्याप्तिबुद्धौ न स्वव्याप्यत्वबुद्धौ च प्रत्येकवृत्तिव्याप्त्या अपेक्षितविषयत्वात् ॥ प्रत्येकवृत्तिव्याप्ति
ज्ञानं विना तद्बोधाभावात् ॥ अपि च यत्र धूमत्वव्याप्त्योर्वैशिष्ट्यं प्रत्यक्षमेव प्रत्यक्षे … तत्र लाघवाद्व्याप्यत्वज्ञा
नमेव कारणतावच्छेदकम् ॥ न चैवमतिरिक्तविशिष्टज्ञानकारणत्वे गौरवं कार्यकारणभावग्रहदशायां फलमुखगौर
वस्यासिद्धासिद्धिभ्यामदोषत्वात् ॥ न चाथेति … मतेऽनुमितिहेतुव्याप्तिस्मरणाद्धूमवत्त्वज्ञानसहितेन मनसा तुटा
देः ॥ यथा परामर्शानिरवयवद्रव्यं तित्स्पर्शेमानत्वात् ॥ आकाशवदित्यादौ प्रत्येकानुमानोपनीतातींद्रियसाध्यसाधनयोः ॥ का
रादृशितयोः स्मरणो व्याप्तिज्ञानेनामनसा व्याप्यानुभवः ॥ अनुमानयोः प्रत्येकं तदुभयसहचारविषयत्वेन व्याप्यग्राहकत्वात् ॥ न चा

णेन्द्रियव्याप्यत्वमतीन्द्रियेऽप्यनुमेयं तत्रापि व्याप्तिग्राहकाभावात्॥ नचैवं तत्तदुपनयसहितस्य मनसो बहिरर्थे प्रमाजनकत्वमुपनयस्य
१६ प्रमाणान्तरत्वं द्रष्टव्यादेः सन्निकर्षादिवदुपनयस्य नियतव्यापारस्याभावेन प्रमाणमकरणत्वात् सहकारिता च तदभावेऽपि भवति
बहिरिन्द्रियलिङ्गशब्दादेः सादृश्यादिव्यापारं विनापि चिन्तोपनीतपदार्थो नो बाधकानवतारे मनसा संसर्गानुभवस्य सकलजनसिद्धत्वा
त्॥ कथमन्यथा कविकाव्यादिकमिति भूयसा देतत्॥ पक्षधर्मस्य व्याप्यताज्ञानं नेन्द्रियेणावच्छेदकसन्निकर्षतोऽनुपनीतसामानाधिकर
ण्यस्य व्याप्यत्वस्यायोग्यत्वात् न च धूमत्वेन सकलधूमे व्याप्यत्वावगमात् पूर्वमेव नोद्बोधसंस्कारात् स्मरणाद्वा उपनीतव्याप्याभेदग्रहः॥ प्र
त्यभिज्ञानेन तावद्विशिष्टस्यैवेति वाच्यम्॥ एवं हि धूमवत्त्वेन वह्निमत्त्वज्ञानात् धूमवत्त्वविशिष्टे पर्वते संस्कारवशात् प्रत्यभिज्ञाव्या
प्तिज्ञानापेक्षणाद्वह्निमद्भेदग्रहो वह्निमत्त्वग्रहो वा स्यात्॥ किमनुमानेन॥ पृथक् वह्निमत्त्वस्मरणात्तत्र नास्ति किन्तु व्याप्यस्य वह्निदक
तयेति चेन्न तं वह्निमानयं न वेति संशयानुरोधेन स्वातन्त्र्येण वह्निमत्त्वस्मरणात्॥ न च विशिष्टज्ञाने स्वातन्त्र्य विशेषणज्ञानत्वेन हेतुत्वे गौर
वात्॥ अयमयो यत्र विशिष्टधूमवत्त्वमवगतः स तत्र संस्कारवशाद्व्याप्यप्रत्यक्षे भासते यथा तत्तायाः प्रत्यभिज्ञाने॥ न च यत्र नैव विशिष्टप्रत्यव
निरवगतः यत्र चैकदेशे स्मृत्युपलब्धं तत्र संस्कारवशात्स्मृत्युपाहरमिचेद्दत्तामिति ज्ञानमन्यत्रानुमानमिति चेत्तर्हि पक्षधर्मधूमेऽपि न
पुरा विशिष्टव्याप्तिरवगतेति कथं संस्कारवशात्तदनुव्याप्तिवोधः प्रत्यक्षेण॥ न च सहचारदर्शनजसंस्कारसहितेन्द्रियेण व्यभिचार न्युम
